'प्रश्नपत्र-प्रारूपम्'
'कक्षा - अष्टमी'
2019 - 20

प्र०1 एकस्य गद्यांशस्य हिन्दीभाषायाम् अनुवादः। (1×5 = 5)
(अत्र गद्यद्वयं भविष्यतः। प्रथम-गद्यभागः एकतः अष्टमपाठपर्यन्तं द्वितीय-गद्यश्च अष्टमतः पञ्चदश-पाठपर्यन्तं भविष्यति)

प्र०2 द्वयोः श्लोकयोः हिन्दी भाषायामनुवादः। (2×4 = 8)
(अत्र श्लोकत्रयं भविष्यन्ति।)
1. प्रथमः श्लोकः ⇒ एकतः पञ्चमपाठपर्यन्तम्।
2. द्वितीयः श्लोकः ⇒ षष्ठतः दशमपाठपर्यन्तम्।
3. तृतीयः श्लोकः ⇒ एकादशपाठतः पञ्चदशपाठपर्यन्तम्।

प्र०3 गद्यांशं पठित्वा तदाधारेण संस्कृतभाषायाम् एव प्रश्नानाम् उत्तराणि। (पठित-अवबोधनम्) (1×5 = 5)
(इत्यत्र अस्मिन् प्रश्ने एकपाठतः आरभ्य पञ्चदशपाठपर्यन्तं कस्यचिदपि पाठस्य एकः गद्यांशः भवितुम् अर्हति)।

प्र०4 हिन्दीभाषायां कथायाः सारः। (1×5=5)
(पाठ्यपुस्तकस्य कस्याश्चिदपि कथायाः सारं प्रष्टुं शक्नुवन्ति)

प्र०5 पाठ्यपुस्तकस्य अभ्यासात् प्रश्नानामुत्तराणि। (1×4=4)
(अत्र पञ्च अथवा षड् प्रश्नाः स्युः। त्रिषु-त्रिषु पाठेषु एकः प्रश्नः भवेत् अर्थात् पञ्चदशपाठानां पञ्चभागाः स्युः, एकभागे त्रयः पाठाः भविष्यन्ति)

Downloaded from cclchapter.com

प्र०६ प्रश्ननिर्माणम् । (1×5=5)

(पाठ्यपुस्तकस्य केषुचित् पाठेषु एव प्रश्न-निर्माणं विद्यते अतः प्रश्नमेतत् कुत्रापि ग्रहीतुं शक्यते)

प्र०७ रिक्तस्थानपूर्तिः । (1×5=5)

(अत्र मञ्जूषा दीयते । मञ्जूषायाम् क्रियापदानि, अव्ययपदानि, अन्यपदानि वा भवितुमर्हन्ति । अतः सम्पूर्णे पुस्तके एतादृशाः प्रश्नाः विद्यन्ते ।)

प्र०८. श्लोकलेखनम् (अर्थसहितम्) । (1×4=4)

(प्रश्न-पत्रे द्वितीये-प्रश्ने श्लोकत्रयं भविष्यन्ति, एतान् श्लोकान् विहाय पाठ्यपुस्तकात् कोऽपि श्लोको भवेत्)

प्र०९ शब्दरूपाणि (यथानिर्दिष्टानि) (1×4=4)

(पाठ्यक्रमे निर्धारिताः सामान्यशब्दाः एव स्युः तथा च पाठ्यपुस्तकस्य अभ्यासेषु आगतानां शब्दानां ग्रहणमपि कर्तुं शक्यते)

प्र०१० धातुरूपाणि (यथानिर्दिष्टानि) (1×4=4)

(यथा शब्दरूपविषये तथैव अत्रापि)

प्र०११ सन्धिम् / सन्धिच्छेदम् । ($\frac{1}{2}$×6=3)

(पाठ्यपुस्तकमधिकृत्य एव । एकतः पञ्चदशपाठपर्यन्तम्)

प्र०१२ संख्यात्मकशब्दाः । (1×4=4)

(1 तः 100 पर्यन्तम्)

Downloaded from cclchapter.com

प्र०13 प्रकृति-प्रत्ययविभागं संयोजनं च। ($\frac{1}{2}$x6=3)
(पाठ्यपुस्तकमधिकृत्य एव। एकतः पञ्चदशपाठपर्यन्तम्)

प्र०14 विपरीतार्थकपदानि। ($\frac{1}{2}$x4=2)
(पाठ्यपुस्तकमधिकृत्य एव। एकतः पञ्चदशपाठपर्यन्तम्)

प्र०15 पदपरिचयम्। (1x4=4)
(पाठ्यपुस्तकमधिकृत्य पाठ्यपुस्तके आगतानां धातूनां/शब्दानां परिचयः अथवा पाठ्यक्रमे निर्धारितानां धातूनां/शब्दानां परिचयः भवेत्।)

प्र०16 निर्देशानुसारम् प्रश्नानामुत्तराणि। (2x5=10)
अत्र प्रश्नस्य पञ्चभागाः (क. ख. ग. घ. ङ) भविष्यन्ति, तत्र भिन्न-भिन्न-विषयबोधकाः प्रश्नाः भविष्यन्ति। एते सर्वे प्रश्नाः पाठ्यपुस्तकस्य अभ्यासात् एव भविष्यन्ति। विविध-विषय-विवरणम्-

* वाक्येभ्यः अव्ययपदचयनम्।
* समानार्थकपदानि।
* विशेषण विशेष्यमेलनम्।
* भिन्नप्रकृतिकपदचयनम्।
* उपयुक्तकथनानां कृते आम् अनुपयुक्तकथनानां कृते 'न' इति लेखनम्।
* कर्तृपदचयनम्।
* क्रियापदचयनम्।
* उपसर्ग-धातु पृथक्करणम्।
* श्लोकांशयोजनम् श्लोकांशपूर्तिः च।
* घटनाक्रम।

(अत्र परीक्षापत्रनिर्माता स्वेच्छया विषयचयनं कृत्वा पञ्चप्रश्नाः प्रक्ष्यति।)

Downloaded from cclchapter.com

प्र०17 तत्समपदानि । ($\frac{1}{2}$x6 = 3)

(पाठ्यपुस्तकस्य अभ्यासेषु प्रदत्तानि अथवा शब्दार्थेषु)

प्र०18 लकारपरिवर्तनम् । (1x2=2)

(पाठ्यपुस्तकस्य अभ्यासेषु अपि वर्तन्ते अथवा लट्, लृट्, लोट्, लङ्लकारेषु भवेत्)

प्र०19 संस्कृतभाषासम्बन्धित - बहुविकल्पयुक्ताः पञ्चप्रश्नाः । (1x5)

(संस्कृतभाषासम्बन्धित - मूलभूतविषयाणां उपरि प्रश्नाः स्यात् तथा च प्रत्येकस्य प्रश्नस्य चत्वारि उत्तराणि दत्तानि स्युः)


① नरेश मलोटिया 'शास्त्री'
रा० आदर्श कन्या व० मा० वि० नादौन
जिला - हमीरपुर (हि०प्र०) - 177033
दूरभाष - 9817707260 / 8351007260

② निर्मल शर्मा 'शास्त्री'
रा० उ० पाठशाला
को० वा० - धर्मशाला
दूरभाष - 9418385073, 8219409966


19/09/2019

Downloaded from cclchapter.com

कक्षा-अष्टमी

विषयः - संस्कृतम्

समयः होरात्रयम्  पूर्णाङ्काः 85

(1)

सामान्यनिर्देशाः ⇒

१. प्रश्नानाम् उत्तराणि स्पष्टभाषया लिखत ।
२. सर्वे प्रश्नाः अनिवार्याः सन्ति ।
३. प्रश्नाङ्काः पुरतः लिखिताः सन्ति ।

प्र॰1 अधोलिखितगद्यांशयोः कस्यचिदेकस्य गद्यांशस्य हिन्दी-भाषायाम् अनुवादं विधीयन्ताम् । (5)

(क) प्रेमली अवदत् - अधुना चुल्यां काष्ठानि प्रज्ज्वालय । प्रेमलः काष्ठानि प्रज्ज्वाल्य अपृच्छत् - अग्रे किं करवाणि? प्रेमली अकथयत् - यावत् चुल्ली सम्यक् न ज्वलति, तावत् फूत्कुरु, किमन्यत् ? प्रेमलेन चुल्ली सम्यक् प्रज्ज्वालिता । अथ च अपृच्छत् - अधुना किं करवाणि ? प्रेमली अवदत् - घटात् हण्ड्यां जलं पूरय । ततः हण्डीं चुल्याम् उपरि स्थापय ।

(ख) जनवरी मासस्य तृतीये दिवसे 1831 तमे ख्रिस्ताब्दे महाराष्ट्रस्य नायगांव-नाम्नि स्थाने सावित्री अजायत । तस्याः माता लक्ष्मीबाई पिता च खंडोजी इति अभिहितौ । नववर्षदेशीया सा ज्योतिबा फुले महोदयेन परिणीता । सोऽपि तदानीं त्रयोदशवर्षकल्पः एव आसीत् । यतोहि सः स्त्रीशिक्षायाः प्रबलः समर्थकः आसीत् अतः सावित्र्याः मनसि स्थिता अध्ययनाभिलाषा उत्सं प्राप्तवती । इतः परं सा साग्रहम् आङ्गलभाषाया अपि अध्ययनं कृतवती ।

प्र॰2 अधोलिखित-श्लोकेषु कयोश्चिद् द्वयोः श्लोकयोः हिन्दीभाषायाम् अनुवादं क्रियन्ताम् । 4+4=(8)

Downloaded from cclchapter.com

(क) स्त्रियां रोचमानायां सर्वं तद् रोचते कुलम् ।
तस्यां त्वरोच्चमानायां सर्वमेव न रोचते ॥ (2)

(ख) तनुः कूपो महालम्ब-
स्तले तस्यास्ति पानीयम् ।
कृषन्त्या मे घटं रज्ज्वा
करेऽप्यास्ते महास्फोटः ॥

(ग) वृक्षाग्रवासी न च पक्षिराजः
त्रिनेत्रधारी न च शूलपाणिः ।
त्वग्वस्त्रधारी न च सिद्धयोगी
जलं च बिभ्रन्न घटो न मेघः ॥

प्र०3 अधोलिखितम् अनुच्छेदं पठित्वा निर्दिष्ट-प्रश्नानाम् उत्तराणि संस्कृतभाषायां दीयताम् । 1×5=(5)

आसीत् कश्चित् चञ्चलो नाम व्याधः । पक्षिमृगादीनां ग्रहणेन सः स्वीयां जीविकां निर्वाहयति स्म । एकदा सः वने जालं विस्तीर्य गृहम् आगतवान् । अन्यस्मिन् दिवसे प्रातःकाले यदा चञ्चलः वनं गतवान् तदा सः दृष्टवान् यत् तेन विस्तारिते जाले दौर्भाग्याद् एकः व्याघ्रः बद्धः आसीत् । सोऽचिन्तयत्, 'व्याघ्रः मां खादिष्यति अतएव पलायनं करणीयम् ।'

(क) व्याधस्य नाम किम् ?
(ख) चञ्चलः जालं विस्तीर्य कुत्र आगतवान् ?
(ग) जाले कः बद्धः आसीत् ?
(घ) केषां ग्रहणेन चञ्चलः जीविकां निर्वाहयति स्म ?
(ङ) 'खादिष्यति' इत्यस्मिन् पदे लकारः, पुरुषः वचनम् च किम् ?

Downloaded from cclchapter.com

प्र०4 पाठ्यपुस्तकम् आधारीकृत्य कस्याश्चित् एकस्याः कथायाः सारं हिन्दीभाषायां लिखत— ⑤

(क) बिलस्य वाणी न कदापि मे श्रुता

(ख) प्रेमलस्य प्रेमल्याश्च कथा

प्र०5 अधोलिखितेषु ~~प्रश्न~~ प्रश्नेषु केषाञ्चित् चतुर्प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत— 1×4=④

(क) सूर्यः कस्यां दिशायां उदेति ?

(ख) अस्माकं प्रयासः कस्य रक्षणे अपेक्षितः ?

(ग) अत्र वानरपुङ्गवः कः ?

(घ) गजपरिमाणं कः धारयति ?

(ङ) ~~स्वकीय~~ स्वकीयं साधनं किं भवति ?

(च) कस्य यशः नश्यति ?

प्र०6 रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत — 1×5= ⑤

(क) सुरक्षाप्रबन्धनस्य दायित्वं गजधराः निभालयन्ति स्म ।

(ख) तेषां स्वामिनः असमर्थाः सन्ति ।

(ग) कार्यसमाप्तौ वेतनानि अतिरिच्य सम्मानमपि प्राप्नुवन्ति ।

(घ) गजधरः सुन्दरः शब्दः अस्ति ।

(ङ) तडागाः संसारसागराः कथ्यन्ते ।

प्र०7 मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत 1×5=⑤

| नौकाम् , पृथिवी , तदा , चला , अस्तं |
|---|

(क) सूर्यः पूर्वदिशायाम् उदेति पश्चिमदिशि च .... गच्छति ।

Downloaded from cclchapter.com

(ख) सूर्यः अचलः पृथिवी च ......।

(ग) ....... स्वकीये अक्षे चूर्णति।

(घ) यदा पृथिव्याः छायापातेन चंद्रस्य प्रकाशः अवरुध्यते ....... चन्द्रग्रहणं भवति।

(ङ) नौकायाम् उपविष्टः मानवः ..... स्थिरामनुभवति।

प्र०8. संस्कृतपाठ्यपुस्तकम् आधारीकृत्य उक्तं श्लोकम् अर्थसहितं लिखत, यः अस्मिन् प्रश्न-पत्रे न भवेत्। (4)

प्र०9. अधोलिखित-शब्देषु केषाञ्चित् चतुर्शब्दानां शब्दरूपाणि यथानिर्दिष्ट-विभक्तीनां त्रिषु वचनेषु लिखत: 1×4=(4)

(क) लता – प्रथमा-विभक्तिः

(ख) राम – तृतीया-विभक्तिः

(ग) मातृ – पञ्चमी-विभक्तिः

(घ) नदी – सप्तमी-विभक्तिः

(ङ) अस्मद् – द्वितीया-विभक्तिः

(च) फल – सम्बोधन

प्र०10 अधोलिखित-धातुषु केषाञ्चित् चतुर्धातूनां धातुरूपाणि यथानिर्दिष्ट-लकारपुरुषयोः त्रिषु वचनेषु लिखतः 1×4=(4)

(क) खाद् – लृट्लकारः, उत्तमपुरुषः।

(ख) भू – लोट्लकारः, प्रथमपुरुषः।

(ग) गम् – लट्लकारः, मध्यमपुरुषः।

(घ) चर् – लङ्लकारः, प्रथमपुरुषः।

(ङ) पा (पिब्) – लृट्लकारः, मध्यमपुरुषः।

(च) दृश् (पश्य) – लट्लकारः, उत्तमपुरुषः।

Downloaded from cclchapter.com

प्र०11. अधोलिखितेषु पदेषु यथापेक्षितं सन्धिं / विच्छेदं कुरुत –

$\frac{1}{2} \times 6 = 3$

(क) तस्य + अस्ति ⇒ ........

(ख) ..... + ..... ⇒ अप्यास्ते

(ग) महालम्बः + तले ⇒ ..........

(घ) ..... + ...... ⇒ भरिष्याम्याहरिष्यामि

(ङ) सु + उक्तिः ⇒ .......

(च) ..... + ..... ⇒ नगाधिराजः

प्र०12 निम्नलिखितेषु कांश्चित् चतुर्संख्यात्मक-अङ्कान् संस्कृतशब्देषु लिखत :

$1 \times 4 = 4$

16 , 35 , 48 , 66 , 80 , 96 .

प्र०13 अधोलिखितेषु पदेषु प्रकृति-प्रत्ययविभागं संयोजनं वा कुरुत –

$\frac{1}{2} \times 6 = 3$

(क) करणीय ⇒ ..... + .....

(ख) ..... ⇒ गम् + क्त्वा

(ग) ..... ⇒ कृ + तुमुन्

(घ) पठितुम् ⇒ ---- + .....

(ङ) ....... ⇒ उप + गम् + ल्यप्

(च) प्रदाय ⇒ .... + .... + .....

प्र०14 अधोलिखितपदानां विपरीतार्थकपदानि लिखत –

$\frac{1}{2} \times 4 = 2$

(क) उदयः ..........

(ख) अचलः ......

(ग) अन्धकारः ......

Downloaded from cclchapter.com

(घ) स्थिरः .......

प्र०15 अधोलिखितेषु पदेषु चतुर्पदानां पदपरिचयं कुरुत । $1 \times 4 = 4$

पश्य, आगच्छ, प्रचलिष्यति, शक्रस्य, तले, मुनिना

प्र०16. यथानिर्दिष्टं कुरुत — $2 \times 5 = 10$

(क) उपयुक्तकथनानां समक्षं 'आम्' अनुपयुक्तकथनानां समक्षं 'न' इति लिखत— $\frac{1}{2} \times 4 = 2$

1) कातरो युद्धे युद्ध्यते । ☐
2) कस्तूरी मृगात् जायते । ☐
3) मृगात् सिंहः पलायते । ☐
4) कंसः जघान कृष्णम् । ☐

~~(ख) श्लोकांशान्~~

(ख) विशेषण-विशेष्यानाम् उचितं मेलनं कुरुत — $\frac{1}{2} \times 4 = 2$

| विशेष्यपदानि | विशेषणपदानि |
| --- | --- |
| संस्कृतिः | अयं |
| इतिहासे | महत्त्वाधायिनी |
| प्रदेशः | प्राचीने |
| समवायः | एकः |

(ग) भिन्नप्रकृतिकं पदं चिनुत — $\frac{1}{2} \times 4 = 2$

(1) गच्छति, पठति, धावति, अहसत्, क्रीडति ।
(2) छात्रः, सेवकः, शिक्षकः, लेखिका, क्रीडकः ।
(3) पत्रम्, मित्रम्, पुष्पम्, आम्रः, नक्षत्रम् ।
(4) व्याघ्रः, भल्लूकः, गजः, कपोतः, वृषभः, सिंहः ।

Downloaded from cclchapter.com

(घ) अव्ययपदानि चिनुत — $\frac{1}{2}\times4=2$

(1) राधा अपि नृत्यति । ........।

(2) त्वं कदा गृहं गमिष्यसि। ........।

(3) अधुना कः समयः । ........।

(4) इदानीं त्वं श्लोकं पठ। ........।

(ङ) समानार्थकपदानि मेलयत — $\frac{1}{2}\times4=2$

| | |
|---|---|
| (1) सलिलम् | कुम्भः |
| (2) गृहम् | जलम् |
| (3) द्रुतम् | भवनम् |
| (4) घटः | शीघ्रम् |

प्र०17 अधोलिखितेषु तद्भवपदेषु षड्पदानां तत्समपदानि (संस्कृतपदानि) लिखत। $\frac{1}{2}\times6=3$

(क) कड़वा .....

(ख) तिनका .....

(ग) काठ .....

(घ) कुँआँ .....

(ङ) आज .....

(च) खेत .....

(छ) सात .....

(ज) चूल्हा .....

प्र०18 निम्नलिखित-वाक्येषु कयोश्चित् द्वयोः वाक्ययोः यथानिर्दिष्टं लकारपरिवर्तनम् कुरुत — $1\times2=2$

(क) रामः पठति । (लङ्लकारे)

(ख) त्वम् खेलसि। (लृट्लकारे)

(ग) अहम् चलानि।(लट्लकारे)

Downloaded from cclchapter.com

प्र॰19 निर्देशानुसारं उत्तरत ! 1×5=(5)

(क) 'अहम्' इति पदस्य कः अर्थः ?
(1) तुम (2) मैं (3) वह (4) तू ।

(ख) "लिखति" इत्यत्र कः लकारः ?
(1) लृट्लकारः (2) लङ्लकारः (3) लट्लकारः
(4) लोट्लकारः ।

(ग) संस्कृते कति वचनानि सन्ति ?
(1) चत्वारि (2) पञ्च (3) द्वौ (4) त्रीणि ।

(घ) "मोहनस्य" इत्यत्र का विभक्तिः ?
(1) षष्ठी (2) द्वितीया (3) तृतीया (4) सम्बोधन ।

(ङ) अष्टमकक्षायाः 'सप्तमपाठस्य' नाम किम् ?
(1) सुभाषितानि (2) जलवाहिनी (3) हिमालयः
(4) सप्तभगिन्यः ।

-इति-

(1) नरेश मलोटिया 'शास्त्री' [signature] 19/09/2019
रा॰ आदर्श कन्या व॰ मा॰ वि॰ नादौन, जिला-हमीरपुर
हि॰ प्र॰ - 177033
दूरभाष — 9817707260, 8351007260

(2) निर्मल शर्मा "शास्त्री" [signature: N Shastri]
रा॰ उ॰ पाठशाला
को॰ बा॰ — धर्मशाला
दूरभाष - 94183-85073, 82194-09966

Downloaded from cclchapter.com